04-09-2020

## उपशास्त्री II

संस्कृतसामान्यम् ।

अनिवार्यपत्रम् । प्रश्नपत्रस्वरूपम् ।

13. 'अजाद्यतष्टाप्' सूत्रव्याख्यां कुरुत । 5 अंकाः
14. 'उगितश्च' " " " ।
15. 'वयसि प्रथमे' " " " ।
16. 'षिद्गौरादिभ्यश्च' " " " ।
17. 'वोतो गुणवचनात्' " " " ।
18. 'इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्' सूत्र व्याख्यां कुरुत ।
19. निम्नांकितेषु पदेषु स्त्रीप्रत्ययं चिनुत । 5 अंकाः
    अश्वा, छात्री, तपस्विनी, भवती, विदुषी, नर्तकी, देवी, श्रीमती, साध्वी, कुमारी, देवी, साध्वी, इन्द्राणी, आचार्याणी, युवती, युवति, मघोनी, शूनी, विदुषी, सुन्दरी।
20. निम्नांकितेन शब्देन सह स्त्री प्रत्ययं योजयित्वा पदनिर्माणं कुरुत ।
    इन्द्र, सूर्य, मातुल, महाराज, भुवन्, नायक, सेवक वर्तमान, दिव्य, क्षत्रिय, व्याघ्र, नाग, हय, अज, सुन्दर, पितामह, पटु, मृदु, गन्तृ, भोक्तृ, कोकिल ।
21. निम्नांकितविषयेषु कस्मिन्चित् एकस्मिन् विषये संस्कृतनिबन्धं लिखत। 15 अंकाः

संस्कृतभाषायाः महत्त्वम्, जननीजन्मभूमिश्च स्वर्गादपि गरीयसी, भारतवर्षः, परोपकारः, विद्याधनं सर्वधनंप्रधानम्, सत्संगतिः, अनुशासनस्य महत्त्वम्, मम प्रिय कविः, कम्प्यूटर शिक्षा, छात्रजीवने खेलस्य स्थानम्, ग्राम्यजीवनम्, पर्यावरणम्, पुस्तकालयः, विश्व समस्या कोरोना, संस्कृतदिवसः ।

22. पत्र लेखनम्, आवेदनपत्रम् (विविध विषयेषु)। 5 अंकाः ।

[signature] 04-09-2020

डॉ निर्मल कुमार झा, (स० प्राचार्यः) ।
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

05-09-2020

शास्त्री II

अनिवार्यपत्रम् ।

व्याकरणादितरेऽर्थः ।

रघुवंशम् । श्लोकव्याख्या ।

"शशिनमुपगतेयं कौमुदी मेघमुक्तं,
जलनिधिमनुरूपं जह्नुकन्यावतीर्णा ।
इति समगुणयोगप्रीतयस्तत्र पौराः,
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः ॥"

सन्दर्भः→ प्रस्तुतोऽयं श्लोकः महाकविकालिदासप्रणीतस्य रघुवंशमहाकाव्यस्य षष्ठसर्गात् इन्दुमतीस्वयंवरवर्णनात् उद्धृतोऽस्ति ।

प्रसङ्गः→ कवि कालिदासः अत्र अजेन्दुमत्योः सौभाग्यं सम्बन्धरूपं जनमुखैः सदृष्टान्ते वर्णयति ।

अन्वयः→ इयं (इन्दुमती) मेघमुक्तं शशिनम् उपगता कौमुदी (इव), अनुरूपं जलनिधिम् अवतीर्णा जह्नुकन्या (इव) इति तत्र समगुणयोगप्रीतयः पौराः नृपाणां श्रवणकटु एकवाक्यं विवव्रुः ।

शब्दार्थः व्याकरणञ्च → इयम् = इन्दुमती । मेघमुक्तम् = घनरहितम् । शशिनम् = इन्दुम् । उपगता = प्राप्ता । कौमुदी = ज्योत्स्ना । अनुरूपं = सदृशम् । जलनिधिम् = समुद्रम् । अवतीर्णा = मिलिता । जह्नुकन्या = गङ्गा । इति = इत्थं । नृपाणां = राज्ञाम् । श्रवणकटु = कर्णपीरुषम् । एकवाक्यम् = एकवचनम् । विवव्रुः = प्रशंसितवन्तः । समग्रगुणयोगप्रीतयः = सकलधर्ममिलनप्रसन्नाः पौराः = जनाः ।

तात्पर्यः →
अजेन्दुमत्योः वरवध्वोः युगलं पूर्णरूपेण सर्वथा युक्तम् । तं युगलं दृष्ट्वा जनाः प्रशंसितवन्त यत् घनरहितं विधुं ज्योत्स्ना प्राप्ता, समुद्रं गङ्गा प्राप्ता । इदं एकवाक्यं अन्यानां समुपस्थितानां नृपाणां कृते कर्णकटु बभूते ।

विशेषः→ अस्मिन् श्लोके शृङ्गाररसः,
वैदर्भीरीतिः, माधुर्यगुणः,
रूपकालङ्कारः, मालिनीछन्दश्च।

(हस्ताक्षर) 05-09-2020

डॉ० निर्मल कुमार झा,
स० प्राचार्यः ।
रा० उ० सं० महावि० सुखसेना,
पूर्णियाँ ।

04-09-2020

संस्कृतसामान्यम् । उपशास्त्री I

अनिवार्यपत्रम् । संस्कृतानुवादः ।

1. वह मुझे देखता है → सः माम् (मां) पश्यति ।
2. वह मुझे देखेगा → सः मां द्रक्ष्यति ।
3. उसने मुझे देखा → सः माम् अपश्यत् ।
4. वह मुझे देखे → सः मां पश्यतु ।
5. उसे मुझे देखना चाहिए → सः मां पश्येत् ।
6. वे दोनों मुझे देखेंगे → तौ मां द्रक्ष्यतः ।
7. वे लोग मुझे देखेंगे → ते मां द्रक्ष्यन्ति ।
8. वह यहाँ ठहरता है → सः अत्र तिष्ठति ।
9. वह यहाँ ठहरेगी → सा अत्र स्थास्यति ।
10. उसे यहाँ ठहरना चाहिए → सः/सा अत्र तिष्ठेत् ।
11. (वह) उसे गुरु की सेवा करनी चाहिए → सः गुरुं सेवेत ।
12. उन दोनों को गुरु की सेवा " " → तौ गुरुं सेवेयाताम् ।
13. उनलोगों को " " " " " → ते गुरुं सेवेरन् ।
14. तुम्हें गुरु की " " " → त्वं गुरुं सेवेथाः ।
15. तुमदोनों को " " " " → युवां गुरुं सेवेयाथाम् ।
16. तुमलोगों " " " " → यूयं गुरुं सेवेध्वम् ।
17. मुझे गुरु की " " " → अहं गुरुं सेवेय ।
18. हमदोनों को गुरु की " " " → आवां गुरुं सेवेवहि ।
19. हमलोगों को " " " " → वयं गुरुं सेवेमहि ।
20. वह उन्नति को प्राप्त करता है → सः उन्नतिं लभते ।
21. वह उन्नति को प्राप्त करे → सः उन्नतिं लभताम् ।
22. उसने उन्नति प्राप्त की → सः उन्नतिम् अलभत ।
23. उसे उन्नति प्राप्त करनी चाहिए → सः उन्नतिं लभेत् ।
24. वह उन्नति प्राप्त करेगा → सः उन्नतिं लप्स्यते ।

04-09-2020

डॉ॰ निर्मल कुमार झा, (स॰ प्राचार्य)
रा॰ उ॰ सं॰ महावि॰ सुखसेना, पूर्णियाँ